Ramsaday College, Amta

AJAY DAS, Sanskrit Department

Sub: Gita, Sem-II, CC-4, Sec-B, Unit-I

१. श्रीमद्भगवद्गीतायाः प्रथमः श्लोकः कः भवति?

उः श्रीमद्भगवद्गीतायाः प्रथमः श्लोकः भवति —
"धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जयः॥" इति।

२. 'अहो बत महत् पापं कर्तुं व्यवसिता वयम्' — अत्र वक्ता कः? महत् पापं किम्?

उः अत्र वक्ता अर्जुनः, स्वजनवधः हि महत् पापम्।

३. 'हरन्ति प्रसभं मनः' — मनः कस्य कानि हरन्ति कथं वा?

उः मनः पुरुषस्य इन्द्रियाणि हरन्ति, इन्द्रियाणि बलपूर्वकं पुरुषस्य मनः विषयान् प्रति आकर्षयन्ति, विकारं प्रापयन्ति, अथ पुरुषस्य विवेकज्ञानं विनश्य इन्द्रियाणि प्रसभं मनः हरन्ति।

४. 'त्रिविधं नरकस्येदं द्वारम्' — त्रिविधं द्वारं किम्?

उः अत्र त्रिविधं द्वारं यथा - काम- क्रोध- लोभश्च।

५. 'अनिच्छन्नपि वार्ष्णेय बलादिव नियोजितः' — कस्य वक्ता? कं प्रति इयमुक्तिः? 'वार्ष्णेय' शब्देन कः बोध्यते?

उ. अत्र वक्ता अर्जुनः, श्रीकृष्णं प्रति इयमुक्तिः; 'वार्ष्णेय' -शब्देन श्रीकृष्णः बोध्यते।

६. कामः कथं ज्ञानम् आवृणोति?

उः धूमेन यथा वह्निः रजसा यथा दर्पणः जरायुणा यथा गर्भः आव्रियते तथैव कामः भोगवृत्तिना मनुष्याणां ज्ञानम् आवृणोति।

Scanned by CamScanner